पतितनयासंयुतो वामभागे शुक्लादण्डेन दक्षे त्रिपथगतटिनीतीरशुद्धाम्बुभागे। मायावीजस्य कर्णे सुरमुनिसहितो ध्यानयुक्तं वदामि प्रीत्या लोकस्य तस्मात् सुरमुनिगणकैरुच्यते तारनामेति” शब्दार्थचि० धृतवाक्यम् ८रूप्ये न०राजनि०।९नक्षत्रे न०स्त्री०मेदि०“विपत्तारे गुडं दद्यात्” ताराबलादिन्दुरथेन्दुवीर्य्यात्” ज्योति० त०सा० त० उक्ते अध्ययनरूपे प्रथमे १०गौणसिद्धिभेदे। “ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः” सा० का०। “विहन्यमानस्य दुःखस्य त्रित्वात् तद्विघातास्त्रय इति इमा मुख्याः तिस्रः सिद्धयस्तदुपायतया त्वितरा गौण्यः पञ्च सिद्धयस्ता अपि हेतुमत्तया तिस्रः हेतुतया पञ्च व्यवस्थिताः। तास्वाद्या अध्ययनादिलक्षणा सिद्धयो हेतवः मुख्यास्तु हेतुमत्यः। विधिवद्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमसिद्धिस्तारमुच्यते” त०कौ० ११विष्णौ पु०“अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः” भा० अनु० १४९अ० सहस्रनामकथने। १२उच्चशब्दे पु०।१३तद्वति त्रि०मेदि०। १४स्फुरितकिरणे १५निर्मले त्रि० धर०। दिक्शब्दात् परम् तीरस्य तारादेशः। १६तीरे। दक्षिणतारं दक्षिणतीरमित्यर्थः १७उच्चैःस्वरे त्रि० १८नेत्रकनीनिकायां न० स्त्री० “मत्तयेव घूर्णितमन्दतारया” काद०। “तारैर्बभूवे परभागलाभतः” माघः शुद्धमुक्ताफले। “तारहेममहारत्नविमानशतशोभितम्” भाग० ४।६।२७। प्रणवे “तारो मायारमायोगो मनोर्दीपनमुच्यते”। (ओं श्रीं ह्रीं) दी० त० “तारं व्योमाग्निमनुयुग्दण्डी ज्योतिर्मनुर्मतः” दी० त०। “हारममलं तरलतारमुरसि दधतम्” जयदेवः। “उरसि निहिततारोहारः” अमरुः। “तारलोलबलयेन करेण” सा०द०।

**तारक** त्रि० तारयति तॄ–णिच्–ण्वुल्। १तारयितरि। “तत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे” जाबालोप०। स्त्रियां कापि अत इत्त्वम्। २दैत्यभेदे तत्कथा शिवपुराणे दृश्या। ३कर्णे ४भेलके च मेदि०। तारैव स्वार्थे क। “तारका ज्योतिषि” पा० अजादि० टाप् न अत इत्त्वम्। तारका। ५नेत्रकनीनिकायां स्त्री। ६चक्षुषि न०स्त्री० मेदि०। “तस्मिन् विप्रकृताः काले तारकेण दिवौकसः” कुमा०। “अभिभाव्यतारकमहर्ष्हिमद्युतिबिम्बमस्तमितभानु नभः” माघः “कुमारस्तुतिषु तारकोद्धरणम्” काद०। न दण्डग्रानां नेत्रोत्पाटनमिति ध्वन्यर्थः। “पतनं तारकादीनाम्” सुश्रु० “तनुप्रकाशेन विचेयतारका” रघुः। “तारकावर्षमिव धर्म्मविनाशपिशुनम्” “कापि विहृत्य दिवावसाने लोहिततारका” काद०। “त्र्यधिकदशयतिर्ननौ रौ भवेतां ररौ तारका, इत्युत्तरत्नाकरोक्ते अष्टादशाक्षरपादके ७छन्दोभेदे च। [तत्कथा शिवपु० दृश्या।

**तारकजित्** पु० तारकं दैत्यं जयति जि–क्विप्। कार्त्तिकेये

**तारकाक्ष** पु० तारकासुरस्य ताराक्षापरपर्य्याये पुत्रभेदे “निर्जितेषु च दैत्येषु तारकस्य सुतास्त्रयः। ताराक्षः कमलाक्षश्च विद्युन्माली च पार्थिव!” इत्युपक्रमे “काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः। राजतं कमलाक्षस्य विद्युन्मालिन आयसम्” भा० क० ६त०। २कुमारानुचरभेदे “महाजठरपादाङ्गास्तारकाक्षाश्च भारत!” भा० श० ४६ अ०।

**तारकब्रह्म** न० कर्म्म०। रामस्य (ओं रामाय नमः) षडक्षरे मन्त्रे। “षडक्षरं महामन्त्रं तारकब्रह्म उच्यते। रामाय नम इत्येतत् प्रणवादि षडक्षरम्” इति अन्योऽपि मन्त्रः पद्मपुर० उक्तो यथा। “मुमूर्षोर्मणिकर्ण्यान्तु अर्द्धोदकनिवासिनः। अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम्। ओं श्रीरामरामेत्येतन्मन्त्रं तारकमुच्यते। अतस्त्वं जानकीनाथ! परं ब्रह्म विनिश्चितम्”।

**तारकादि** संजातार्थे इतच्प्रत्ययनिमित्ते पा० गण सू० उक्ते शब्दगणे स च गणो यथा

“तारका, पुष्प, कर्णक, मञ्जरी, ऋजीष, क्षण, सूत्र मूत्र, निष्क्रमण, पुरीष, उच्चार, प्रचार, विचार, कुड्मल, कण्टक, मुसल, मुकुल, कुसुम, कुतूहल, स्तवक, किसलय, पल्लव, खण्ड, वेग, निद्रा, मुद्रा, बुभुक्षा, धेनुष्या, पिपासा, श्रद्धा, अभ्र, पुलक, अङ्गारक, वर्णक, द्रोह, दोह, सुख, दुःख, उत्कण्ठा, भर, व्याधि, वर्मन्, व्रण, गौरव, शास्त्र, तरङ्ग, तिलक, चन्द्रक, अन्धकार, गर्व, मुकुर, हर्ष, उत्कर्ष, रण, कुवलय, गर्ध, क्षुध्, सीमन्त, ज्वर, गर, रोग, रोमाञ्च, पण्डा, कज्जल, तृष्, कोरक, कल्लोल, स्थपुट, फल, कञ्चुक, शृङ्गार, अङ्कुर, शैवाल, बकुल, श्वभ्र, आराल, कलङ्क, कर्दम, कन्दल, मूर्च्छा, अङ्गार, हस्तक, प्रतिबिम्ब, विघ्न, तन्त्र, प्रत्यय, दीक्षा, गर्ज, (गर्भादप्राणिनि”) “तदस्य